**दिनाङ्क :- 11.09.2026**
**प्रात: - 06:55**

## अथवार्ता:

### प्रधानमन्त्री अंतरिक्ष

प्रधानमन्त्री नरेन्द्रमोदी स मुदघोषितवान् यत् भारतं अन्ताराष्ट्रियविधिनियमानां, सम्वादविद्ये: बहुपक्षीय साहाभ्यभावना धारेण सुरक्षितशान्तिपूर्ण-शाश्वत-रूपकस्य अन्तरिक्ष मण्डलस्य पूर्णं हठं च समर्थनं सन्धारयति। प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् पारदर्शि- सत्यनिष्ठतया समग्रलोककल्याणस्य विनियुक्तानि स्यु:।

प्रधानमन्त्रिणा नेन्द्रमोदिना एतानि वक्तव्यानि फ्रान्सदेशस्य पेरिसनगरे समायोजिते अन्तर्राष्ट्रय-अन्तरिक्ष- सम्मेलनवसरे आभासीय माध्यमेन प्रकाशितानि।

प्रधानमन्त्री नरेन्द्रमोदी सबलं प्रतिपादितवान् मत् अन्तरिक्ष कक्षास्तु सम्व्रृद्धिसङ्घर्ष-स्थाने सहयोगभावना, अल्पकालिक-ताभस्थाने शाश्वतता, बहिष्करण स्थाने च समावेशिता प्राथमिकरूपेण स्यात् इति प्रतिपादिनवान्।

भारतीय-अन्तरिक्षअनुसंधान सङ्घटनस्य भूमिकां प्रतिपादयन् श्रीमोदी प्रोक्तवान् यत् स्वीयकार्यदक्षता कारणेन स्वीय-ऐतिहासिक अभियानैरच एतया संस्थया वैश्विक-प्रशंसा समर्पिता।

### अष्टादशं ब्रिक्स –शिखर सम्मेलनं

अष्टादशं ब्रिक्स –शिखर सम्मेलनं श्व: प्रभृति नादेहल्या: भारत मण्डपम इत्यत्र समारप्स्यते। सम्मेलनमालक्ष्य भव्यायोजनस्य समग्रसज्जा: सम्प्रति अन्तियें चरणे प्रतिष्टा:। द्विदिवसीये शिखर-सम्मेलने ब्राजील-चीन-मिस्र-इथियोपिया-इंडोनेशिया-भारतं-ईरान-रूस-सऊदी अरब-दक्षिण अफ्रीका-संयुक्त अरब अमीरात-इत्येंत समेत्य एकादश-प्रमुखा: विकासशील अर्थ्व्यवस्था: मञ्चं धारयिष्यन्ति।

भारतस्य अध्यक्षतायां समायोज्यमाण स्य एतस्य शिखर-सम्मेलनस्य विषय:- नवाचार-सहयोग-स्थिरतायाश्च कृते निर्माणनिति। शिखर-सम्मेलने रूसदेशीय राष्ट्रपति: व्लादिमिरि पुतिन इत्यसौ चीनदेशीय: राष्ट्रपति: शी जिनपिंग इत्यसौ, दक्षिण अफ्रीकाया: राष्ट्रपति: सिरिल रामाफोसा, मिस्रदेशीय: राष्ट्रपति: अब्देल फतह-अल-सिसी, इण्डोनेशियाया: राष्ट्रपति: प्रबोवो सुबियांतो, ईरानदेशस्य राष्ट्रपति: मसूद पेजेशि‍कयन- इत्यसौ, अबूधाबी-क्राउन प्रिंस-शेख खालिद बिन मोहम्मद-बिन-जायद-अल-नाह्यान इत्यसौ, अथ इथियोपियाया: प्रधानमन्त्री अबी अहमद-अली इत्येतं समेत्य वैश्विक-नेतार: सम्मेलने भागं भजिष्यन्ति।

### दिल्ली-यातायात

ब्रिक्स- शिखर-सम्मेलनमालक्ष्य दिल्ली-यातायात-आरक्षि-बलेन संसूचितं अत् अद्य मद्याह्ने द्विवादनत: रात्रौ सार्द्ध-अष्टवादन पर्यन्तं प्रमुख-मार्गेषु यातायोत परिवर्तनं, नियिन्त्रिता च व्यवस्था प्रभ्वेत्। आरक्षि-बलानुसारेण् आपातकालिका:, आवश्यकाश्च सेवा: प्राभम्यं भजरेन्। सममेव दिल्ली मेट्रो-यान-विभागेनापि आवश्यका: सूचना:प्रसारिता:।

**महिला क्रिकेट एशिया**

**p**

महिला-क्रिकेट् -एशिया-चषक-स्पर्धाया: उपान्त्यचक्रे गतरात्रौ भारत-बाड्.गलादेश-दलयो: मध्ये समायोजितं द्वन्द्वे भारतेन बाड्.गलादेश दलं चत्वारिंश्त्धावनांक पराभूय एशिया-चषक- स्पर्धाया: निर्णायक-च्रके स्थानं सम्प्राप्तम्। दुबई-नगरे अन्ताराष्ट्रिय-क्रिकेट्-प्राड्.गणे समायोजिते द्वन्द्वे भारतेन प्रथमं दण्डेन क्रीडयता एक-न्यून-सार्धशतं धावनांका: समर्जिता:, प्रत्युत्तरे बाड्.गलादेशदलस्य पर्याय: नवाधिक-शतं धावनांकेषु एव समाप्तो जात:।

**।। इति वार्ता:।।**